२९२

५४ श्रीमद्रामायणे युद्धकांडे सर्ग १२८

श्रीगणेशायनमः वहूनिनामवर्षाणिगतस्यसुमहद्वनं श्रुणोम्यहंप्रीतिकरंममनाथस्यकीर्त्तनं १
कल्याणीवतगाथेयं लौकिकीप्रतिभातिमे एतिजीवंतमानंदोनरंवर्षसतादपि २ राघवस्यहरी
णांचकथमासीत्समागमः कस्मिन्देशेकिमाश्रित्यतत्वमाख्याहिपृछतः ३ सपृष्टोराजपुत्रेण
वृस्यांसमुपवेशितः आचचक्षेततःसर्वं रामस्यचरितंवने ४ यथाप्रव्राजितोरामोमातुर्दत्तेवरे
तवंयथाचपुत्रशोकेनराजादशरथोमृतः ५ यथादूतैस्त्वमानीतस्तूर्णंराजगृहात्प्रभो त्वयायो
ध्यांप्रविष्टेनयथाराज्यंनचेप्सितं ६ चित्रकूटंगिरिंगत्वाराज्येनामित्रकर्षणः निमंत्रितस्त्वयाभ्रा
ताधर्ममाचरतासतां ७ स्थितेनराज्ञोवचने यथाराज्यंविसर्जितं आर्यस्यपादुकेगृह्ययथासिपु
नरागतः ८ सर्वमेतन्महावाहोयथावद्विदितंतव त्वयिप्रतिपयातेतुयद्वृत्तंतंनिवोधमे ९ अपया
तेत्वयितदासमुद्भ्रांतमृगद्विजं परिद्यूनमिवात्यर्थंतद्वनंसमपद्यतः १० तद्धस्तिमृदितंघो

रं सिंघव्याघ्रमृगाकुलं प्रविवेशाथ विजनं सुमहद्दंडकावनं ११ तेनापुरस्ताद्बलवान्गछतांगह
नेवने विनदन्सुमहानादं विराधः प्रत्यदृश्यत: १२ तमुत्क्षिप्य महानादमुर्द्धबाहुमधोमुखं नि
खाते प्रक्षिपंति स्म नदंतमिव कुंजरं १३ तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ सायाह्ने शर
भंगस्य रम्यमाश्रममीयतुः १४ शरभंगे दिवं प्राप्ते रामः सत्यपराक्रमः अभिवाद्य मुनी
न्सर्वाजनस्थानमुपागमत् १५ पश्चाच्छूर्पणखा नाम रामपार्श्वमुपागता १६ ततो रामेण सं
दिष्टो लक्ष्मणः सहसोत्थित १६ प्रगृह्य खड्गं चिछेद कर्णनासे महाबलः चतुर्दश सहस्राणि
जनस्थाननिवासिनां १७ हतानि च सहस्राणि तत्र राघवेण महात्मना १८ एकेन सहसंग्रामे
णा रणमूर्द्धनि अह्नश्चतुर्थभागेन निःशेषा राक्षसाः कृता महाबला महावीर्यास्तपसो विघ्नकारिणः १९
निहता राघवेणाजौ दंडकारण्यवासिनः राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे २० दूषणं चा

ग्नो हत्वा त्रिशिरास्तदनंतरं ततस्ते नार्दिता वाला रावणं समुपागता २१ रावणानुचरो घोरः मारीचो
नाम राक्षसः सो भयामासवै देही भूत्वा रत्नमयो मृगः २२ सा राममब्रुवी दृष्ट्वा वैदेही गृह्यतामिति अ
हो मनोहरः कांतश्चाश्रमो नो भविष्यति २३ ततो रामो धनुष्पाणिर्मृगं तमनुधावति स तं जघ्नान धा
वंते शरेणानतपर्वणा २४ अथ सौम्य दशग्रीव मृगयां याति राघवे लक्ष्मणे चापि निष्क्रांते प्रवि
वेशाश्रमं तदा २५ स ग्राह तरसा सीतां गुरुरवरोहिणीषिवं जातुकामं ततो युद्धे हत्वा गृध्रराजकं २६
प्रगृह्य सहसा सीतां जगामाशु स राक्षसः ततस्त्वद्भुतसंकाशाः स्थिताः पर्वतमूर्द्धनि २७ सीतां गृही
त्वा गच्छंतं वानराः पर्वतोपमाः ददृशुर्विस्मिताकारा रावणं राक्षसाधिपं २८ ततः शीघ्रतरं गत्वा
तद्विमानं मनोजवं आरुह्य सह वैदेह्या पुष्पकं स महाबलः प्रविवेश तदा लंकां रावणो राक्षसेश्व
रः २९ तां सुवर्णपरिक्रांते शुभे महति वेश्मनि प्रविश्य मैथिलीं वाक्यैः सांत्वमास रावणः ३०

रणवृद्रावितं तस्य तछ्रुत्वैत्ततपुंगवं अचिंतयित्वा वैदेही ह्यशोकवनिकांगता [illegible] न्यवचनाद्रामो मृगं हत्वा तदा वनेभि वचमानः काकुत्स्थो दृष्ट्वा गृध्रं साधि व्यथे ३२ गृध्रं हतं तदा दृष्ट्वा रामः प्रियतरं पितुः मार्गमाणास्तु वैदेही राघवसह लक्ष्मण ३३ घोरावीरमचवरत दृनोद्दे[illegible]शोम्य पुष्पिताने अशोसद्तु महाररापकबंधं नाम राक्षसं ३४ ततः कबंधवचनाद्रामः सत्यपराक्रमः ऋषमूकागिरिं प्राप्य गत्वा सुग्रीवेण समागतः ३५ ततः समागमः पूर्वं प्रीत्या हार्दं व्यजायत भ्राता निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा ३६ ततो तारसंवादात्प्लवगाङ्गः प्रणयस्तयोः ३७ रामः स्वबाहुवीर्येण स्वराज्यं प्रत्यपादयत् ३८ वालिनं समरे हत्वा महाकायं महाबलं सुग्रीवं स्थापितो राज्ये लाहिते सर्ववानरैः ३९ रामाय प्रतिजानीते रामपुत्रास्तु मार्गणं आदिशद्वानरेंद्रः सुग्रीवस्य महात्मना दशकोट्यः प्लवंगानां सर्वाः प्रस्थापिता दिशः ४० तेषां नो विप्रनष्टानां विंध्ये पर्वतसत्तमे भृशं शोकाभितप्तानां महान्का

लोत्पवर्तत ४० भ्राता गृध्रराजस्य संपातिर्नाम वीर्यवान् समाख्याति स्म वसतीं सीतां रावणमंदि
रे ४१ सोहं दुःखपरीतानां दुःखं तज्ज्ञातीनां नुदन् आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ४२ तत्राह
मेकामद्राक्षमशोकवनिकां गतां कौशेयवस्त्रां मलिनां निरानंदां दृढव्रतां ४३ तयासमेत्य विधि
वत् पृष्ट्वा सर्वमनिंदितां अभिज्ञानं मया दत्तं रामनामांगुलीयकं अभिज्ञानं मणिं लब्ध्वा चरितार्थोह
मागतः ४४ मया च पुनरागम्य रामस्याक्लिष्टकर्मणः अभिज्ञानं मया दत्तमर्चिष्मान्स महामणिः
४५ श्रुत्वा तां मैथिलीं रामस्त्वाशशंसे च जीवितं जीवितांतमनुप्राप्तः पीत्वामृतमिवातुरः ४६ उद्यो
[illegible]ः घोरं दधे लंकावधे मनः जिघांसुरिव लोकांते सर्वल्लोकान्विभावसुः ४७
ततः समुद्रमासाद्य नलं सेतुमकारयत् अतरत्कपिवीराणां वाहिनी तेन सेतुना ४८ प्रहस्तम
वधीन्नीलः कुंभकर्णं तु राघवः [illegible] लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणं ४९

सशक्रेणासमागम्य यमेन वरुणेन च महेश्वरस्वयंभूभ्यां तथा दशरथेन च ५० तैस्च दत्तवरः
श्रीमानृषिभिश्च समागतैः सुरर्षिभिश्च काकुत्स्थो वरांल्लेभे परंतपः ५१ स तु दत्तवरः प्री
त्या वानरैश्च समागतः पुष्पकेण विमानेन किष्किंधामभ्युपागमत् ५२ तां गंगां पुनरा
साद्य वसंतं मुनिसंनिधौ अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हति ५३ ततः स वाक्यैर्मधु
रैर्हनुमतो निशम्य हृष्टो भरतः कृतांजलिः उवाच वाणीं मनसः प्रहर्षणीं चिरस्य पूर्णाः
खलु मे मनोरथाः ५४ इत्यार्षे श्रीमद्रामायणे युद्धकांडे एकोनत्रिंशदधिकशततमो सर्गः १२९
श्रीसंम्वत १९१५ मीती कार्तिक शुद्ध ९ चंद्रे लीखीत्वा [illegible] पाठकानुग्रहार्थं
ध्या॰ ध्यायेल्लक्ष्मी प्रहसितमुखीं कोटीबालार्कभासां विद्युद्वर्णांवरधरां भूषणाचैवसोभां वीतांपूरं सरसिजं
युगं विभ्रतिस्वर्णपात्रं भर्त्रायुक्तं मुहुरभयदां मे सदा साच्युता श्रीः मंत्र सुवर्णवृष्टिं कुरु मे सदा श्री सुधान॰ र कल्पान॰

[illegible]

रा॰म॰
४

~~९~~

१३८

पद्मपुराणे पत्र ४ दा. पु.